## चिन्तिपूजिकथिकुम्बिचर्चश्च। (१०५/३२८२)

'चिति स्मृत्याम्' (धा.पा. १५३६), 'पूज पूजायाम्' (धा.पा. १६४३), 'कथ [1]वाक्यप्रबन्धे' (धा.पा. १८५२), 'कुबि आच्छादने' (धा. पा. १६५६), 'चर्च अध्ययने' (धा. पा. १७१३) [2]चुरादिः, एभ्यो [3]धातुभ्यः युचि प्राप्ते स्त्रियाम् अङ् प्रत्ययो [4]भवति। चिन्ता। पूजा। कथा। कुम्बा। चर्चा। [5]चकारात् युच् अपि भवति। [6]चिन्तना ॥

## आतश्चोपसर्गे। (१०६/३२८३)

[7]आकारान्तेभ्यः[8] उपसर्गे उपपदे स्त्रियाम् अङ् प्रत्ययो भवति। [9]क्तिनोऽपवादः। प्रदा[10]। उपदा। प्रधा। उपधा। श्रदन्तरोरुपसर्गवद् वृत्तिः। श्रद्धा। अन्तर्धा ॥

## ण्यासश्रन्थो युच्। (१०७/३२८४)

[11]ण्यन्तेभ्यो धातुभ्यः, आस श्रन्थ इत्येताभ्यां च [12]स्त्रियां युच् प्रत्ययो भवति। [13]अकारस्यापवादः। कारणा। हारणा। आसना। श्रन्थना। कथम् आस्या? 'ऋहलोर्ण्यत्' (३. १.१२४/२८७२) [14]भविष्यति। वासरूपप्रतिषेधश्च स्त्रीप्रकरणविषयस्य[15]वोत्सर्गापवादस्य। श्रन्थिः क्र्यादिर्गृह्यते 'श्रन्थ विमोचनप्रतिहर्षयोः' (धा.पा. १५११) इति, [16]न चुरादिः 'श्रन्थ ग्रन्थ सन्दर्भे' (धा.पा. १८३९-४०) इति। [17]ण्यन्तत्वेनैव सिद्धत्वात्।

[३१५] [18]घट्टिवन्दिविदिभ्य उपसङ्ख्यानम्। (म.भा. २.१५४)

घट्टना। वन्दना। वेदना।

घट्टेः भौवादिकस्य ग्रहणं 'घट्ट चलने' (धा.पा. २५९) इति, न [19]चौरादिकस्य (धा.पा. १६३१), तस्य णेः इत्येव सिद्धत्वात्।

[३१६] इषेरनिच्छार्थस्य युज् वक्तव्यः। (म. भा. २. १५४)

[20]अध्येषणा। अन्वेषणा।

[३१७] परेर्वा। (म.भा. २.१५४)

पर्येषणा, परीष्टिः ॥

---

1. वाक्यप्रतिबन्धे ड, वाक्यप्रबन्धने ग. 2. चुरादिगणः फ. 3. धातुभ्यः नास्ति फ. 4. विधीयते फ. 5. चकारात् नास्ति अ. ब. ड. 6. चर्चना क, पूजना कुम्बना चर्चना फ, कथना इत्यधिकम् ग. ह. 7. स्त्रियामिति वर्तते इत्यधिकम् ब. 8. धातुभ्यः इत्यधिकम् ड. फ. ह. 9. वाक्यमिदं नास्ति फ. 10. इष्यते इत्यधिकम् ह. 11. स्त्रियामित्येव इत्यधिकम् ब. 12. स्त्रियां नास्ति फ. 13. अकारप्रत्ययस्य अ. क. 14. इति ण्यन्ताद् भविष्यति ड. 15. उत्सर्गस्य ह. 16. न तु ह. 17. ण्यन्तत्वादेव ह. 18. घटि ड. 19. घट्ट संवरणे इत्यस्य इत्यधिकम् मुद्रितपुस्तकेषु. 20. अध्येषणा नास्ति अ. फ.